# संस्कृतवार्ताः

दिनाङ्कः– २०१०.११.१५

सायम्–०६.१०

प्रवाचकः/अनुवादकः/आलेखपरिष्कारकः– दिव्यानन्दझा

अनुवादकः– सूर्यनारायणनन्दः

आलेखपरिष्कारकः– बलदेवानन्दसागरः

टङ्कणसहायिका– तारा

इयमाकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचकः– दिव्यानन्दझा

# मुख्यवार्ताः

- द्वि–जी–स्पैक्ट्रम्–आबण्टन–प्रकरणमाधृत्य अद्य तृतीयेऽपि दिवसे सञ्जात–कोलाहलकारणात् संसदः सदनद्वयस्य कार्यजातं शेषदिवसावधये स्थगितम्।
- द्वि–जी–स्पैक्ट्रम्–वितरणे भ्रष्टाचाराक्षेपणस्य संयुक्त–संसदीय–समित्या अन्वीक्षणं शासनेन निराकृतम्।
- शासनेनाद्य प्रोक्तं यत् केचन देशाः अत्याधुनिक–ब्रह्मोस–प्रक्षेपास्त्रप्रणाल्याः क्रयणाय स्पृहयन्ति।

अपि च,

- राजस्थाने, अजमेरं निकषा विश्व–प्रसिद्धं पुष्करमेलकम् अद्य पारम्परिक–रीत्या समारब्धम्।

———————————————————

## संसद् स्थगिता

द्वि–जी–स्पैक्ट्रम्–आबण्टन–प्रकरणमाधृत्य अद्य तृतीयेऽपि दिवसे सञ्जात–कोलाहल–कारणात् संसदः सदनद्वयस्य कार्यजातं शेषदिवसावधये स्थगितम्। अद्यापि विपक्षिणा द्वि–जी–स्पैक्ट्रम्–आबण्टनप्रवञ्चना–प्रकरणस्य संयुक्त–संसदीय–समित्या अन्वीक्षणार्थं समभ्यर्थितम्। अद्य लोकसभा राज्यसभा च पूर्वं मध्याह्नं यावत् स्थगिते, परञ्च पुनः कलकलः समारब्धः, येन सदनद्वयं शेषदिवसावधये स्थगितीकृतम्।

## द्वि–जी–स्पैक्ट्रम्/शासनम्

द्वि–जी–स्पैक्ट्रम्–वितरणे भ्रष्टाचाराक्षेपणस्य संयुक्त–संसदीय–समित्या अन्वीक्षणं शासनेन निराकृतम्।

अद्य संसदो बहिः वार्ताहरान् भाषमाणः वित्तमन्त्री प्रणवमुखर्जी उक्तवान् यत् कस्मिंश्चिदपि प्रकरणे महालेखा–परीक्षकस्य आख्यापनं संसदि उपस्थापनानन्तरं सार्वजनिक–लेखासमितिं प्रति प्रेषयिष्यते।

## कॉन्ग्रेस्/राजा

तत्रान्तरे, केन्द्रीय–सञ्चार–सूचना–प्रविधिमन्त्री ए.राजा केन्द्रीयमन्त्रिमण्डलात् स्वीयपदम् अत्यजत्।

नवदिल्ल्यां प्रधानमन्त्रिणा डॉ.मनमोहनसिंहेन सह मेलनानन्तरम् असौ वार्ताहरान् व्याहरत् यत् प्रशासनम्

असहज–स्थितेः परित्रातुं, संसदि शान्तिं, सद्भावं च सन्धारयितुम् सः स्वीयपदं सम्प्रति परित्यज्यति। यद्यपि तेनैतदपि समुदीरितं यत् सः आत्मानं निर्दोषित्वेन सत्यापयिष्यति, यतो हि यत् तेन किमप्याचरितं तद् विधेरनुकूलम् एवास्ति। सः समुदीरितवान् यत् तस्मै त्यागपत्रप्रदानविषये परामर्शः डी.एम.के.प्रमुखेण श्रीमता एम्. करुणानिधिना प्रदत्तः, तेन चानुसृतोऽस्ति।

## ब्रह्मोस्

शासनेनाद्य प्रोक्तं यत् केचन देशाः अत्याधुनिक–ब्रह्मोस–प्रक्षेपास्त्र–प्रणाल्याः क्रयणाय स्पृहयन्ति।

प्रतिरक्षामन्त्री ए.के.एण्टनी एतदपि उक्तवान् यत् देशस्य सशस्त्रबलेभ्यः पर्याप्तमात्रया उपपादनानन्तरमेव ब्रह्मोस–प्रक्षेपास्त्राणि देशान्तरेभ्यः विक्रेष्यन्ते।

## व्यापार–मेलकम्

केन्द्रीयवाणिज्योद्योगमन्त्रिणा श्रीमता आनन्दशर्मणा प्रोक्तं यद् भारतं प्रवर्तमाने वित्तवर्षे द्विखर्वपरिमित–अमेरिकीय–डॉलर–मुद्राणां व्यापार–लक्ष्यम् अतिक्रमेत–इति सम्भाव्यते। असौ गतदिने नवदिल्ल्यां प्रगतिमैदाने अन्ताराष्ट्रिय–व्यापारमेलकस्योद्घाटनानन्तरं वार्ताहरान् सम्बोधयति स्म।

## नेपालम्/प्रधानमन्त्री

नेपालदेशे नूतन–प्रधानमन्त्रिणः निर्वाचनाय मतदानानां सप्तदशचक्रमद्य व्याक्षिप्तम्। संसदः कार्यसमित्या एतन्निर्णीतम्। वार्ताहरान् भाषमाणः विधिमन्त्री प्रेमबहादुरसिंहः उक्तवान् यत् अस्य मासस्य एकोऽनविंशे दिनाङ्के मतदानानां परवर्ति–चक्रमनुष्ठास्यते।

## पुष्कर–मेलकम्

राजस्थाने, अजमेरं निकषा विश्व–प्रसिद्धं पुष्करमेलकम् अद्य पारम्परिक–रीत्या समारब्धम्। राज्यस्य क्रीडामन्त्रिणा मांगीलालगरासिया–वर्येण मेलकस्योद्घाटनं विहितम्।

।। इति वार्ताः ।।